# Atmashatkam/Nirvanashatkam

1. मनोबुद्ध्यहंकार चित्तानि नाहं, न च श्रोत्रजिव्हे न च घ्राणनेत्रे । न च व्योम भूमिर्न तेजो न वायुः, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Manobuddhyahaṃkāra chittāni nāhaṃna cha śrotrajihve na cha ghrāṇanetrena cha vyoma
bhūmir na tejo na vāyuḥchidānandarūpaḥ śivo'ham śivo'ham.

2. न च प्राणसंज्ञो न वै पंचवायुः, न वा सप्तधातुः न वा पञ्चकोशः । न वाक्पाणिपादं न चोपस्थपायु, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Na ca praṇasajño na vai paṃcavāyuḥ na vā saptadhātur na vā paṃcakośaḥ na vākpāṇipādaṃ na copasthapāyu cidānandarūpaḥ śivo'ham śivo'ham.

3. न मे द्वेषरागौ न मे लोभमोहौ, मदो नैव मे नैव मात्सर्यभावः । न धर्मो न चार्थो न कामो न मोक्षः, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Na me dveṣarāgau na me lobhamohau mado naiva me naiva mātsaryabhāvaḥ na dharmo na cārtho na kāmo na mokṣaḥ cidānandarūpaḥ śivo'ham śivo'ham.

4. न पुण्यं न पापं न सौख्यं न दुःखं, न मन्त्रो न तीर्थो न वेदा न यज्ञ । अहं भोजनं नैव भोज्यं न भोक्ता, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Na puṇyaṃ na pāpaṃ na saukhyaṃ na dukhyaṃ na mantro na tīrthaṃ na vedā na yajña
ahaṃ bhojanaṃ naiva bhojyaṃ na bhoktā cidānandarūpaḥ śivo'ham śivo'ham.

5. न मे मृत्युशंका न मे जातिभेदः, पिता नैव मे नैव माता न जन्मः । न बन्धुर्न मित्रं गुरूर्नैव शिष्यः, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Na me mṛtyuśaṃkā na me jātibhedaḥ pitā naiva me naiva mātā na janmaḥ
na bandhur na mitraṃ gurunaiva śiṣyaḥ cidānandarūpaḥ śivo'ham śivo'ham.

6. अहं निर्विकल्पो निराकार रूपो, विभुत्वाच सर्वत्र सर्वेन्द्रियाणाम् । न चासङ्त नैव मुक्तिर्न मेयः, चिदानन्दरूपः शिवोऽहम् शिवोऽहम्।

Ahaṃ nirvikalpo nirākāra rūpo vibhutvāca sarvatra sarveṃdriyāṇaṃ na cāsangata naiva muktir na meyaḥ cidānandarūpaḥ śivo'ham śivo'ham.